## द्वितीयः पाठः

# कालज्ञो वराहमिहिरः



अस्ति उज्जयिन्याः निकटे 'कपित्थ' (कायथा) नामाख्यो ग्रामः। तत्र आदित्योपासकः 'आदित्यदासः' नामा कश्चित् विप्रः प्रतिवसति स्म। तस्य गृहे 'वराहमिहिरः' नामा बालकोऽजायत। वराहमिहिरस्य जन्म 499 (नवनवत्यधिकचतुश्शतके) ख्रिस्ताब्दे सञ्जातम्।

बालकः वराहमिहिरः स्वकीयपित्रा एव ज्यौतिषविद्यामध्यगच्छत्। ततः सः पाटलिपुत्रनगरं गत्वा प्रसिद्धखगोलशास्त्रज्ञात् आर्यभटात् खगोलशास्त्रस्याध्ययनं कृतवान्।

तदानीम् उज्जयिनी विद्यायाः प्रमुखकेन्द्रमासीत्। उज्जयिन्यां गुप्तवंशस्य संरक्षणे बहुविधकला-विज्ञान-सांस्कृतिककेन्द्रादीनि संरक्षितानि वर्द्धितानि चासन्। अत्र नानादिग्देशेभ्यः विद्वज्जनानां समागमः भवति स्म अत एव वराहमिहिरोऽपि समाप्याध्ययनम् अस्मिन्नेव नगरं समागतः।

वराहमिहिरः वेदज्ञः वैज्ञानिकश्चासीत्। सः गतानुगतिकतायाः स्थाने वैज्ञानिकदृष्टिकोणस्य महत्त्वं प्रतिपादितवान्। ग्रहनक्षत्रप्रभावाश्रितं फलित-ज्यौतिषं नाम शास्त्रं तस्य प्रियप्रतिपाद्यविषयोऽभवत्। तेन कृता कालगणना प्रामाणिकी अस्ति। भारते फलितज्यौतिषस्य प्रथमः आचार्यः वराहमिहिरः एव अस्ति न तत्पूर्वं फलितज्यौतिषस्य शास्त्रं प्राप्यते भारते। एष एव सर्वप्रथमं प्रतिपादितवान् यत् चन्द्रस्य प्रकाशः स्वकीयः नास्ति, अपितु सः सूर्यस्य प्रकाशेन प्रकाशते।

वराहमिहिरेण बृहत्संहिता-बृहज्जातकं-पञ्चसिद्धान्तिका ग्रन्थाः विरचिताः। एतेषु ग्रन्थेषु खगोल-विद्यायाः गूढतत्त्वानां प्रतिपादनमस्ति। अनेन न केवलं खगोलतत्त्वानां निरूपणं कृतम् अपितु पृथिव्याः गोलकत्वं, गुरुत्वाकर्षणस्य सिद्धान्तः, पर्यावरणविज्ञानं, जलविज्ञानं, भूविज्ञानमपि विस्तरेण विवेचितम्। "पादपाः वल्मीकाश्च अधोभौमिकजलस्थितिं प्रदर्शयन्ति" इति तस्य कथनमासीत्। आधुनिकवैज्ञानिकाः अपि तदवलम्ब्य अन्वेषणं कुर्वन्ति।

नानादेशेषु परिभ्रमन् स्वकीयज्ञानदीप्त्या दीप्यमानः 587 (सप्ताशीत्यधिकं पञ्चशतम्) ख्रिस्ताब्दे सः दिवङ्गतः। स्वकीयविस्तृतज्ञानेन खगोलसदृशं गहनविषयमपि सरलं प्रस्तुतवान्। ज्यौतिषविद्यामहार्णवं तर्तुं तस्य ग्रन्थाः नौका इव सन्ति। सः महान् कालज्ञः आसीत्। ज्यौतिर्विद्यायां तु वराहमिहिरः तिमिरनाशकः सूर्य इव आसीत्।

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| कालज्ञः | – ज्योतिषी | अजायत | – जन्म लिया, | वल्मीकाः | – दीमक |
| महार्णवम् | – महासागर को | गतानुगतिकतायाः | – अन्धानुकरण | | |
| तिमिरनाशकः | – अन्धकार-विनाशक, | खगोल | – आकाशमण्डल | | |
| फलितज्यौतिषम् | – नक्षत्र ग्रहों के अनुसार फल बताने वाली विद्या | | | | |

## अभ्यासः

1. एकपदेन उत्तरं लिखत—

क. वराहमिहिरस्य जन्म कुत्र अभवत्?

ख. वराहमिहिरस्य पितुः नाम किम्?

ग. वराहमिहिरः कस्मात् ज्यौतिषं पठितवान्?

घ. वराहमिहिरः खगोलशास्त्रं कस्मात् पठितवान्?

ङ. वराहमिहिरः अध्ययनं समाप्य कुत्र अगच्छत्?

2. एकवाक्येन उत्तरं लिखत—

क. वराहमिहिरस्य जन्म कदा अभवत्?

ख. वराहमिहिरः कदा दिवङ्गतः?

ग. भारते फलितज्यौतिषस्य प्रथमः आचार्यः कः अभवत्?

घ. वराहमिहिरेण के ग्रन्थाः विरचिताः?

ङ. पादपाः वल्मीकाश्च किं प्रदर्शयन्ति?

3. उचितशब्देन रिक्तस्थानं पूरयत—

क. वराहमिहिरः अध्ययनं समाप्य ..................... आगतः।(उज्जयिनीम्/पाटलिपुत्रनगरम्)

ख. आर्यभटः ................ आसीत्। (खगोलशास्त्री/साहित्यशास्त्री)

ग. बृहज्जातकं नाम ग्रन्थः ................. विरचितः। (आर्यभटेन/वराहमिहिरेण)

घ. कपित्थग्रामः .................... निकटे अस्ति। (पाटलिपुत्रनगरस्य/उज्जयिन्याः)

ङ. गुरुत्वाकर्षणस्य सिद्धान्तः ............ प्रतिपादितः। (आदित्यदासेन/वराहमिहिरेण)

4. उचितं योजयत—

| | (अ) | | (ब) |
|---|---|---|---|
| क. | उज्जयिन्याः निकटे | – | वराहमिहिरः |
| ख. | वराहमिहिरस्य जन्म | – | 587 खिस्ताब्दे |
| ग. | आदित्यदासस्य पुत्रः | – | कपित्थग्रामः |
| घ. | अध्ययनं समाप्य वराहमिहिरः समागतः | – | 499 खिस्ताब्दे |
| ङ. | वराहमिहिरस्य मृत्युः | – | उज्जयिनीम् |

5. **शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत—**

क. "पञ्चसिद्धान्तिका" इत्यस्य ग्रन्थस्य रचयिता वराहमिहिरः अस्ति।

ख. बृहज्जातकं ग्रन्थस्य रचयिता आर्यभटः अस्ति।

ग. आर्यभटः खगोलशास्त्री आसीत्।

घ. वराहमिहिरस्य कृता कालगणना प्रामाणिकी अस्ति।

ङ. वराहमिहिरस्य जन्म वर्तमानमध्यप्रदेशराज्ये अभवत्।

6. **नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत—**

क. आदित्योपासकः।

ख. अस्मिन्नेव।

ग. समाप्याध्ययनम्।

घ. बालकोऽजायत।

ङ. वर्द्धिताश्च।

च. खगोलशास्त्रस्याध्ययनम्।

**योग्यताविस्तारः —**

- स्वशिक्षकस्य साहाय्येन उज्जयिन्यां वेधशालायाः अवलोकनं कुरुत।
- सूर्यात् दूरीक्रमेण ग्रहाणां नामानि लिखत।
- अन्यप्राचीनभारतीयवैज्ञानिकानाम् अध्ययनं कुरुत।
- निकटस्य तारामण्डलकेन्द्रस्य अवलोकनं कुरुत।

*ज्यौतिषं चाक्षुषं शास्त्रम्।*